# Natya Shastra Chapter 16

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૬

## Document Information

Text title : naaTyashaastra adhyaaya 16 vaagabhinaye kaavyalakShaNo

File name : natya16.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : Sowmya Krishnapur krsowmya at yahoo.com

Proofread by : Sowmya Krishnapur krsowmya at yahoo.com

Latest update : May 26, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૧૬

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ષોડશોઽધ્યાયઃ

વિભૂષણં ચાક્ષરસંહતિશ્ચ શોભાભિમાનૌ ગુણકીર્તનં ચ ।
પ્રોત્સાહનોદાહરણે નિરુક્તં ગુણાનુવાદોઽતિશયશ્ચ હેતુઃ ॥ ૧॥

સારુપ્યમિથ્યાધ્યવસાયસિદ્ધિ
પદોચ્ચયાક્રન્દમનોરથાશ્ચ ।
આખ્યાનયાચ્ચાપ્રતિષેધપૃચ્છા
દૃષ્ટાન્તનિર્ભાસનસંશયાશ્ચ ॥ ૨॥

આશીઃ પ્રિયોક્તિઃ કપટઃ ક્ષમા ચ
પ્રાપ્તિશ્ચ પશ્ચાત્તપનં તથૈવ ।
અર્થાનુવૃત્તિર્હ્યુપપત્તિયુક્તી
કાર્યોઽનુનીતિઃ પરિદેવનં ચ ॥ ૩॥

ષટ્ત્રિંશદેતાનિ હિ લક્ષણાનિ
પ્રોક્તાનિ વૈ ભૂષણસંમિતાનિ ।
કાવ્યેષુ ભાવાર્થગતાનિ તજ્ઞૈઃ
સમ્યગ્ પ્રયોજ્યાનિ યથારસં તુ ॥ ૪॥

અલઙ્કારૈર્ગુણૈશ્ચૈવ બહુભિઃ સમલઙ્કૃતમ્ ।
ભૂષણૈરિવ વિન્યસ્તૈસ્તદ્ ભૂષણમિતિ સ્મૃતમ્ ॥ ૫॥

યત્રાલ્પૈરક્ષરૈઃ શ્લિષ્ટૈર્વિચિત્રમુપવર્ણ્યતે ।
તમપ્યક્ષરસઙ્ઘાતં વિદ્યાલ્લક્ષણસંજ્ઞિતમ્ ॥ ૬॥

સિદ્ધૈરર્થૈસ્સમં કૃત્વા હ્યસિદ્ધોઽર્થઃ પ્રસાધ્યતે ।
યત્ર શ્લક્ષ્ણવિચિત્રાર્થા સા શોભેત્યભિધીયતે ॥ ૭॥

ધાર્યમાણસ્તુ બહુભિર્વચનૈઃ કાર્યયુક્તિભિઃ ।
ન યઃ પર્યવતિષ્ઠેત સોઽભિમાનસ્તુ સંજ્ઞિતઃ ॥ ૮॥

કીર્ત્યમાનૈર્ગુણૈર્યત્ર વિવિધાર્થસમુદ્ભવૈઃ ।
દોષા ન પરિકથ્યન્તે તજ્જ્ઞેયં ગુણકીર્તનમ્ ॥ ૯॥

લોકે ગુણાતિરિક્તાનાં બહૂનાં યત્ર નામભિઃ ।
એકોઽભિશબ્દ્યતે યસ્તુ વિજ્ઞેયં ગુણકીર્તનમ્ ॥ ૧૦॥

ઉત્સાહજનનૈઃ સ્પષ્ટૈરર્થૈરોપમ્યસંશ્રયૈઃ ।
પ્રસિદ્ધૈરુપગૂઢં ચ જ્ઞેયં પ્રોત્સાહનં બુધૈઃ ॥ ૧૧॥

યત્રૈકસ્યાપિ શબ્દસ્ય દર્શનાત્સુબહૂન્યપિ ।
યાન્તિ સિદ્ધિમનુક્તાનિ તદુદાહરણં સ્મૃતમ્ ॥ ૧૨॥

નિરુક્તં દ્વિવિધં પ્રોક્તં તથ્યં ચાતથ્યમેવ વા ।
સિદ્ધિપ્રસાધિતં તથ્યમતથ્યં ચાપ્રસાધિતમ્ ॥ ૧૩॥

ગુણાનુવાદો હીનાનામુત્તમૈરુપમાકૃતઃ ।
ઉત્તમાર્થવિશેષો યઃ સ ચાપ્યતિશયઃ સ્મૃતઃ ॥ ૧૪॥

બહૂનાં ભાષમાણાનામેકસ્યાર્થવિનિર્ણયાત્ ।
સિદ્ધોપમાનવચનં હેતુરિત્યભિસંજ્ઞિતઃ ॥ ૧૫॥

અપદેશસ્તુ પરોક્ષો યસ્માદુત્પદ્યતેઽનુકરણેન ।
લક્ષણસમાનકરણાત્ સારૂપ્યં તત્તુ નિર્દેશ્યમ્ ॥ ૧૬॥

અભૂતપૂર્વૈર્યત્રાર્થૈસ્તુલ્યસ્યાર્થસ્ય નિર્ણયઃ ।
સ મિથ્યાધ્યવસાયસ્તુ પ્રોચ્યતે કાવ્યલક્ષણે ॥ ૧૭॥

બહૂનાં તુ પ્રધાનાનાં મધ્યે યન્નામ કીર્ત્યતે ।
એકાર્થસાધનકૃતં સા સિદ્ધિરિતિ કીર્ત્યતે ॥ ૧૮॥

ગુણૈર્બહુભિરેકાર્થૈઃ પદૈર્યઃ સમ્પ્રશસ્યતે ।
પદોચ્ચયં તુ તદ્વિદ્યાન્નાનાર્થગ્રથનાત્મકમ્ ॥ ૧૯॥

આત્મભાવમુપન્યસ્ય પરસાદૃશ્યયુક્તિભિઃ ।
તીવ્રાર્થભાષણં યત્સ્યાદાક્રન્દઃ સ તુ કીર્તિતઃ ॥ ૨૦॥

હૃદયસ્થસ્ય ભાવસ્ય સુસ્પષ્ટાર્થપ્રદર્શનમ્ ।
અન્યાપદેશકથનૈર્મનોરથ ઇતિ સ્મૃતઃ ॥ ૨૧॥

અપૃષ્ટૈરથવા પૃષ્ટૈર્નિર્ણયઃ ક્રિયતે તુ યઃ ।
આખ્યાનમિતિ તજ્જ્ઞેયં લક્ષણં નાટકાશ્રયમ્ ॥ ૨૨॥

આદૌ યત્ક્રોધજનનમન્તે હર્ષપ્રવર્ધનમ્ ।
યત્તુ પ્રિયં પુનર્વાક્યં સા યાચ્ઞા પરિકીર્તિતા ॥ ૨૩॥

કાર્યેષુ વિપરીતેષુ યદિ કિઞ્ચિત્ પ્રવર્તતે ।
નિવાર્યતે ચ કાર્યજ્ઞૈઃ પ્રતિષેધઃ પ્રકીર્તિતઃ ॥ ૨૪॥

યત્રાકારોદ્ભવૈર્વાક્યૈરાત્માનમથવા પરમ્ ।
પૃચ્છન્નિવાભિધત્તેઽર્થં સા પૃચ્છેત્યભિસંજ્ઞિતા ॥ ૨૫॥

વિદ્વાન્ પૂર્વોપલબ્ધૌ યત્સમત્વમુપપાદયેત્ ।
નિદર્શનકૃતસ્તજ્જ્ઞૈઃ સ દૃષ્ટાન્ત ઇતિ સ્મૃતઃ ॥ ૨૬॥

અનેકયુક્તિમદ્વાક્યમનેકાર્થપ્રસાધકમ્ ।
અનેકવાક્યસંયુક્તં તન્નિર્ભાસનમુચ્યતે ॥ ૨૭॥

અપરિજ્ઞાતતત્ત્વાર્થં યત્ર વાક્યં સમાપ્યતે ।
સોઽનેકત્વાદ્વિચારાણાં સંશયઃ પરિકીર્તિતઃ ॥ ૨૮॥

યત્ર શાસ્ત્રાર્થસમ્પન્નાં મનોરથસમુદ્ભવામ્ ।
અપ્રાર્થનીયામન્યાં વા વિદુસ્તામાશિષં બુધાઃ ॥ ૨૯॥

આદૌ યત્ ક્રોધજનનમન્તે હર્ષપ્રવર્ધનમ્ ।
તત્ પ્રિયં વચનં જ્ઞેયમાશીર્વાદસમન્વિતમ્ ॥ ૩૦॥

છલયુક્ત્યા ત્વન્યેષામભિસન્ધાનાભિભાવકંકપટમ્ ।
દ્વિત્રિપ્રયોગયુક્તો વિજ્ઞેયઃ કપટસઙ્ઘાતઃ ॥ ૩૧॥

દુર્જનોદાહૃતૈ રૂક્ષૈઃ સભામધ્યેઽતિતાડિતઃ ।
અક્રોધઃ ક્રોધજનનૈર્વાક્યૈર્યઃ સા ક્ષમા ભવેત્ ॥ ૩૨॥

દૃષ્ટ્વૈવાવયવં કઞ્ચિદ્ભાવો યત્રાનુમીયતે ।
પ્રાપ્તિં તામભિજાનીયાલ્લક્ષણં નાટકાશ્રયમ્ ॥ ૩૩॥

અકાર્યં સહસા કૃત્વાઽકૃત્વા કાર્યમથાપિ વા ।
સન્તાપો મનસો યસ્તુ પશ્ચાત્તાપઃ પ્રકીર્તિતઃ ॥ ૩૪॥

પ્રશ્રયેણાર્થસંયુક્તં યત્પરસ્યાનુવર્તનમ્ ।

સ્નેહાદ્દાક્ષિણ્યયોગાદ્વા સાનુવૃત્તિસ્તુ સંજ્ઞિતા ॥ ૩૫॥

પ્રાપ્તાનાં યત્ર દોષાણાં ક્રિયતે શમનં પુનઃ ।
સા જ્ઞેયા હ્યુપપત્તિસ્તુ લક્ષણં નાટકાશ્રયમ્ ॥ ૩૬॥

સાધ્યતે યોઽર્થસમ્બન્ધો મહદ્ભિઃ સમવાયતઃ ।
પરસ્પરાનુકૂલ્યેન સા યુક્તિઃ પરિકીર્તિતા ॥ ૩૭॥

યત્રાપસારયન્ દોષં ગુણમર્થેન યોજયેત્ ।
ગુણાભિવાદં દોષાન્ વા કાર્યં તલ્લક્ષણં વિદુઃ ॥ ૩૮॥

અપૂર્વક્રોધજનિતમપરાધં પ્રમૃજ્ય યત્ ।
સેવાર્થં મધુરં વાક્યમનુનીતિઃ પ્રકીર્તિતા ॥ ૩૯॥

દોષૈર્યદન્યનામોક્તૈઃ પ્રસિદ્ધાર્થૈઃ પ્રયોજયેત્ ।
અન્યત્રાર્થેન સમ્બદ્ધં જ્ઞેયં તત્ પરિદેવનમ્ ॥ ૪૦॥

ઉપમા રૂપકં ચૈવ દીપકં યમકં તથા ।
અલઙ્કારાસ્તુ વિજ્ઞેયા ચત્વારો નાટકાશ્રયાઃ ॥ ૪૧॥

યત્કિઞ્ચિત્ કાવ્યબન્ધેષુ સાદૃશ્યેનોપમીયતે ।
ઉપમા નામ સા જ્ઞેયા ગુણાકૃતિસમાશ્રયા ॥ ૪૨॥

એકસ્યૈકેન સા કાર્યા હ્યનેકેનાથવા પુનઃ ।
અનેકસ્ય તથૈકેન બહૂનાં બહુભિસ્તથા ॥ ૪૩॥

તુલ્યં તે શશિના વક્ત્રમિત્યેકેનૈકસંશ્રયા ।
શશાઙ્કવત્ પ્રકાશન્તે જ્યોતીંષીતિ ભવેત્તુ યા ॥ ૪૪॥

એકસ્યાનેકવિષયા સોપમા પરિકીર્તિતા ।
શ્યેનબર્હિણભાસાનાં તુલ્યાર્થમિતિ યા ભવેત્ ॥ ૪૫॥

એકસ્ય બહુભિઃ સામ્યાદુપમા નાટકાશ્રયા ।
બહૂનાં બહુભિર્જ્ઞેયા ઘના ઇવ ગજા ઇતિ ॥ ૪૬॥

પ્રશંસા ચૈવ નિન્દા ચ કલ્પિતા સદૃશી તથા ।
યા કિઞ્ચિત્સદૃશી જ્ઞેયા સોપમા પઞ્ચધા બુધૈઃ ॥ ૪૭॥

પ્રશંસા યથા -
દૃષ્ટ્વા તુ તાં વિશાલાક્ષીં તુતોષ મનુજાધિપઃ ।
મુનિભિઃ સાધિતાં કૃચ્છ્રાત્ સિદ્ધિં મૂર્તિમતીમિવ ॥ ૪૮॥

નિન્દા યથા -
સા તં સર્વગુણૈર્હીનં સસ્વજે કર્કશચ્છવિમ્ ।
વને કણ્ટકિનં વલ્લી દાવદગ્ધમિવ દ્રુમમ્ ॥ ૪૯॥

કલ્પિતા યથા -
ક્ષરન્તો દાનસલિલં લાલામન્થરગામિનઃ ।
મતઙ્ગજા વિરાજન્તે જઙ્ગમા ઇવ પર્વતાઃ ॥ ૫૦॥

સદૃશી યથા -
યત્ત્વયાદ્ય કૃતં કર્મ પરિચિત્તાનુરોધિના ।
સદૃશં તત્તવૈવ સ્યાદતિમાનુષકર્મણઃ ॥ ૫૧॥

કિઞ્ચિત્સદૃશી યથા -
સમ્પૂર્ણચન્દ્રવદના નીલોત્પલદલેક્ષણા ।
મત્તમાતઙ્ગગમના સમ્પ્રાપ્તેયં સખી મમ ॥ ૫૨॥

ઉપમાયા બુધૈરેતે ભેદા જ્ઞેયાઃ સમાસતઃ ।
શેષા યે લક્ષણૈર્નોક્તાસ્તે ગ્રાહ્યાઃ કાવ્યલોકતઃ ॥ ૫૩॥

નાનાધિકરણાર્થાનાં શબ્દાનાં સમ્પ્રદીપકમ્ ।
એકવાક્યેન સંયુક્તં તદ્દીપકમુચ્યતે ॥ ૫૪॥

પ્રસૃતં મધુરં ચાપિ ગુણૈઃ સર્વૈરલઙ્કૃતમ્ ।
કાવ્યે યન્નાટકે વિપ્રાસ્તદ્દીપકમિતિ સ્મૃતમ્ ॥ ૫૫॥

યથા - સરાંસિ હંસૈઃ કુસુમૈશ્ચ વૃક્ષા
મત્તૈર્દ્વિરેફૈશ્ચ સરોરુહાણિ ।
ગોષ્ઠીભિરુદ્યાનવનાનિ ચૈવ
તસ્મિન્નશૂન્યાનિ સદા ક્રિયન્તે ॥ ૫૬॥

સ્વવિકલ્પેન રચિતં તુલ્યાવયવલક્ષણમ્ ।
કિઞ્ચિત્સાદૃશ્યસમ્પન્નં યદ્રૂપં રૂપકં તુ તત્ ॥ ૫૭॥

નાનાદ્રવ્યાનુરાગાદ્યૈર્યદૌપમ્યગુણાશ્રયમ્ ।
રૂપનિર્વર્ણનાયુક્તં તદ્રૂપકમિતિ સ્મૃતમ્ ॥ ૫૮॥

યથા - પદ્માનનાસ્તાઃ કુમુદપ્રહાસા વિકાસિનીલોત્પલચારુનેત્રાઃ ।
વાપીસ્ત્રિયો હંસકુલૈર્નઃ

સ્વનદ્ભિર્વિરેજુરન્યોન્યમિવાહ્વયન્ત્યઃ ॥ ૫૯॥

શબ્દાભ્યાસસ્તુ યમકં પદાદિષુ વિકલ્પિતમ્ ।
વિશેષદર્શનઞ્ચાસ્ય ગદતો મે નિબોધત ॥ ૬૦॥

પાદાન્તયમકં ચૈવ કાઞ્ચીયમકમેવ ચ ।
સમુદ્ગયમકં ચૈવ વિક્રાન્તયમકં તથા ॥ ૬૧॥

યમકં ચક્રવાલં ચ સન્દષ્ટયમકં તથા ।
પદાદિયમકઞ્ચૈવ હ્યામ્રેડિતમથાપિ ચ ॥ ૬૨॥

ચતુર્વ્યવસિતઞ્ચૈવ માલાયમકમેવ ચ ।
એતાદ્દૃશવિધં જ્ઞેયં યમકં નાટકાશ્રયમ્ ॥ ૬૩॥

ચતુર્ણાં યત્ર પાદાનામન્તે સ્યાત્સમમક્ષરમ્ ।
તદ્વૈ પાદાન્તયમકં વિજ્ઞેયં નામતો યથા ॥ ૬૪॥

દિનક્ષયાત્ સંહૃતરશ્મિમણ્ડલં
    દિવીવ લગ્નં તપનીયમણ્ડલમ્ ।
વિભાતિ તામ્રં દિવિ સૂર્યમણ્ડલં
    યથા તરુણ્યાઃ સ્તનભારમણ્ડલમ્ ॥ ૬૫॥

લોકાનાં પ્રભવિષ્ણુર્દૈત્યેન્દ્રગદાનિપાતનસહિષ્ણુઃ ।
જયતિ સુરદૈત્યજિષ્ણુર્ભગવાનસુરવરમથનકારી વિષ્ણુઃ ॥ ૬૬॥

પાદસ્યાન્તે તથા ચાદૌ સ્યાતાં યત્ર સમે પદે ।
તત્કાઞ્ચીયમકં ચૈવ વિજ્ઞેયં સૂરિભિર્યથા ॥ ૬૭॥

યામં યામં ચન્દ્રવતીનાં દ્રવતીનાં
    વ્યક્તાવ્યક્તા સારજનીનાં રજનીનામ્ ।
ફુલ્લે ફુલ્લે સમ્ભ્રમરે વાભ્રમરે વા
    રામા રામા વિસ્મયતે ચ સ્મયતે ચ ॥ ૬૮॥

અર્ધેનૈકેન યદ્વૃત્તં સર્વમેવ સમાપ્યતે ।
સમુદ્ગયમકં નામ તજ્જ્ઞેયં પણ્ડિતૈર્યથા ॥ ૬૯॥

કેતકીકુસુમપાણ્ડુરદન્તઃ
    શોભતે પ્રવરકાનનહસ્તી ।
કેતકીકુસુમપાણ્ડુરદન્તઃ

    શોભતે પ્રવરકાનનહસ્તી ॥ ૭૦॥

એકૈકં પાદમુત્ક્રમ્ય દ્વૌ પાદૌ સદૃશૌ યદિ ।
વિક્રાન્તયમકં નામ તદ્વિજ્ઞેયમિદં યથા ॥ ૭૧॥

સ પૂર્વં વારણો ભૂત્વા દ્વિશૃઙ્ગ ઇવ પર્વતઃ ।
અભવદ્દન્તવૈકલ્યાદ્વિશૃઙ્ગ ઇવ પર્વતઃ ॥ ૭૨॥

પૂર્વસ્યાન્તેન પાદસ્ય પરસ્યાદિર્યદા સમઃ ।
ચક્રવચ્ચક્રવાલં તુ વિજ્ઞેયં નામતો યથા ॥ ૭૩॥

તુલ્યાત્પાદદ્વયાદન્ત્યાદેકેનાદિર્યદા સમઃ ।
સર્વત્ર ચક્રવાલન્તુ તદ્વિજ્ઞેયં બુધૈર્યથા ॥ ૭૪॥

શૈલા યથા શત્રુભિરાહતા હતા
    હતાશ્ચ ભૂયસ્ત્વનુપુઙ્ખપુઙ્ખગૈઃ ।
ખગૈશ્ચ સર્વૈર્યુધિ સઞ્ચિતાશ્ચિતા-
    શ્ચિતાધિરૂઢા નિહિતાસ્તલૈસ્તલૈઃ ॥ ૭૫॥

આદૌ દ્વૌ યત્ર પાદૌ તુ ભવેતામક્ષરે સમૌ ।
સન્દષ્ટયમકં નામ વિજ્ઞેયં તદ્બુધૈર્યથા ॥ ૭૬॥

પશ્ય પશ્ય રમણસ્ય મે ગુણાન્
    યેન યેન વશગાં કરોતિ મામ્ ।
યેન યેન હિ સમેતિ દર્શનં
    તેન તેન વશગાં કરોતિ મામ્ ॥ ૭૭॥

આદૌ પાદસ્ય તુ યત્ર સ્યાત્ સમાવેશઃ સમાક્ષરઃ ।
પાદાદિયમકં નામ તદ્વિજ્ઞેયં બુધૈર્યથા ॥ ૭૮॥

વિષ્ણુઃ સૃજતિ ભૂતાનિ વિષ્ણુઃ સંહરતે પ્રજાઃ ।
વિષ્ણુઃ પ્રસૂતે ત્રૈલોક્યં વિષ્ણુર્લોકાધિદૈવતમ્ ॥ ૭૯॥

પાદસ્યાન્તં પદં યત્ર દ્વિર્દ્વિરેકમિહોચ્યતે ।
જ્ઞેયમામ્રેડિતં નામ યમકં તત્ર સૂરિભિઃ ॥ ૮૦॥

વિજૃમ્ભિતં નિઃશ્વસિતં મુહુર્મુહુઃ
    કથં વિધેયં સ્મરણં પદે પદે ।
યથા ચ તે ધ્યાનમિદં પુનઃ પુન-

ધ્રુવંગતા તે રજની વિના વિના ॥ ૮૧॥

સર્વે પાદાઃ સમા યત્ર ભવન્તિ નિયતાક્ષરાઃ ।
ચતુર્વ્યવસિતં નામ તદ્વિજ્ઞેયં બુધૈર્યથા ॥ ૮૨॥

વારણાનામયમેવ કાલો
વારણાનામયમેવ કાલઃ ।
વારણાનામયમેવ કાલો
વારણાનામયમેવ કાલઃ ॥ ૮૩॥

નાનારૂપૈઃ સ્વરૈર્યુક્તં યત્રૈકં વ્યઞ્જનં ભવેત્ ।
તન્માલાયમકં નામ વિજ્ઞેયં પણ્ડિતૈર્યથા ॥ ૮૪॥

લલી બલી હલી માલી ખેલી માલી સલી જલી ।
ખલો બલોઽબલો માલી મુસલી ત્વાભિરક્ષતુ ॥ ૮૫॥

અસૌ હિ રામા રતિવિગ્રહપ્રિયા
રહઃપ્રગલ્ભા રમણં મનોગતમ્ ।
રતેન રાત્રિં રમયેત્ પરેણ વા
ન ચેદુદેષ્યત્તરુણઃ પરો રિપુઃ ॥ ૮૬॥

ન પુષ્કરાક્ષઃ ક્ષતજોક્ષિતાક્ષઃ ક્ષરત્ક્ષતેવ્યઃ
ક્ષતજંદુરીક્ષઃ ।
ક્ષતૈર્ગવાક્ષૈરિવ સંવૃતાઙ્ગઃ સાક્ષાત્
સહસ્રાક્ષ ઇવાવભાતિ ॥ ૮૭॥

એભિરર્થક્રિયાપેક્ષૈઃ કાર્યં કાવ્યં તુ લક્ષણૈઃ ।
અતઃ પરં પ્રવક્ષ્યામિ કાવ્યે દોષાન્ ગુણાંસ્તથા ॥ ૮૮॥

ગૂઢાર્થમર્થાન્તરમર્થહીનં
ભિન્નાર્થમેકાર્થમભિપ્લુતાર્થમ્ ।
ન્યાયાવપેતં વિષમં વિસન્ધિ
શબ્દચ્યુતં વૈ દશ કાવ્યદોષાઃ ॥ ૮૯॥

પર્યાયશબ્દાભિહતં ગૂઢાર્થમભિસંજ્ઞિતમ્ ।
અવર્ણ્યં વર્ણ્યતે યત્ર તદર્થાન્તરમિષ્યતે ॥ ૯૦॥

અર્થહીનં ત્વસમ્બદ્ધં સાવશેષાર્થમેવ ચ ।
ભિન્નાર્થમભિવિજ્ઞેયમસભ્યં ગ્રામ્યમેવ ચ ॥ ૯૧॥

વિવક્ષિતોઽન્ય એવાર્થો યત્રાન્યાર્થેન ભિદ્યતે ।
ભિન્નાર્થં તદપિ પ્રાહુઃ કાવ્યં કાવ્યવિચક્ષણાઃ ॥ ૯૨॥

અવિશેષાભિધાનં યત્ તદેકાર્થમિતિ સ્મૃતમ્ ।
અભિપ્લુતાર્થં વિજ્ઞેયં યત્ પદેન સમસ્યતે ॥ ૯૩॥

ન્યાયાદપેતં વિજ્ઞેયં પ્રમાણપરિવર્જિતમ્ ।
વૃત્તભેદો ભવેદ્યત્ર વિષમં નામ તદ્ભવેત્ ॥ ૯૪॥

અનુપશિષ્ટશબ્દં યત્ તદ્વિસન્ધીતિ કીર્તિતમ્ ।
શબ્દચ્યુતઞ્ચ વિજ્ઞેયમશબ્દસ્વરયોજનાત્ ॥ ૯૫॥

એતે દોષાસ્તુ વિજ્ઞેયાઃ સૂરિભિર્નાટકાશ્રયાઃ ।
ગુણા વિપર્યયાદેષાં માધુર્યૌદાર્યલક્ષણાઃ ॥ ૯૬॥

શ્લેષઃ પ્રસાદઃ સમતાસમાધિર્માધુર્યમોજઃ પદસૌકુમાર્યમ્ ।
અર્થસ્ય ચ વ્યક્તિરુદારતા ચ કાન્તિશ્ચ કાવ્યસ્ય ગુણા દશૈતે ॥ ૯૭॥

ઈપ્સિતેનાર્થજાતેન સમ્બદ્ધાનાં પરસ્પરમ્ ।
શ્લિષ્ટતા યા પદાનાં હિ શ્લેષ ઇત્યભિધીયતે ॥ ૯૮॥

વિચારગહનં યત્સ્યાત્ સ્ફુટઞ્ચૈવ સ્વભાવતઃ ।
સ્વતઃ સુપ્રતિબદ્ધઞ્ચ શ્લિષ્ટં તત્ પરિકીર્ત્યતે ॥ ૯૯॥

અપ્યનુક્તો બુધૈર્યત્ર શબ્દોઽર્થો વા પ્રતીયતે ।
સુખશબ્દાર્થસંયોગાત્ પ્રસાદઃ પરિકીર્ત્યતે ॥ ૧૦૦॥

નાતિચૂર્ણપદૈર્યુક્તા ન ચ વ્યર્થાભિદાયિભિઃ ।
દુર્બોધનૈશ્ચ ન કૃતા સમત્વાત્ સમતા મતા ॥ ૧૦૧॥

અન્યોન્યસદૃશા યત્ર તથા હ્યન્યોન્યભૂષણાઃ ।
અલઙ્કારા ગુણાશ્ચૈવ સમાઃ સ્યુઃ સમતાં મતાઃ ॥ ૧૦૨॥

અભિયુક્તૈર્વિશેષસ્તુ યોઽર્થસ્યેહોપલક્ષ્યતે ।
તેન ચાર્થેન સમ્પન્નઃ સમાધિઃ પરિકીર્ત્યતે ॥ ૧૦૩॥

ઉપમાસ્વિહ દૃષ્ટાનામર્થાનાં યત્નતસ્તથા ।
પ્રાપ્તાનાં ચાતિસંક્ષેપાત્ સમાધિર્નિર્ણયો યતઃ ॥ ૧૦૪॥

બહુશો યચ્છ્રુતં વાક્યમુક્તં વાપિ પુનઃ પુનઃ ।

નોદ્વેજયતિ યસ્માદ્ધિ તન્માધુર્યમિતિ સ્મૃતમ્ ॥ ૧૦૫॥

સમાસવદ્ભિર્વિવિધૈર્વિચિત્રૈશ્ચ પદૈર્યુતમ્ ।
સાનુસ્વારૈરુદારૈશ્ચ તદોજઃ પરિકીર્ત્યતે ॥ ૧૦૬॥

અવગીતોઽપિ હીનોઽપિ સ્યાદુદાત્તાવભાસકઃ ।
યત્ર શબ્દાર્થસમ્પત્તિસ્તદોજઃ પરિકીર્તિતમ્ ॥ ૧૦૭॥

સુખપ્રયોજ્યૈર્યચ્છબ્દૈર્યુક્તં સુશ્લિષ્ટસન્ધિભિઃ ।
સુકુમારાર્થસંયુક્તં સૌકુમાર્યં તદુચ્યતે ॥ ૧૦૮॥

સુપ્રસિદ્ધાભિધાના તુ લોકકર્મવ્યવસ્થિતા ।
યા ક્રિયા ક્રિયતે કાવ્યે સાર્થવ્યક્તિઃ પ્રતીયતે ॥ ૧૦૯॥

યસ્યાર્થાનુપ્રવેશેન મનસા પરિકલ્પ્યતે ।
અનન્તરં પ્રયોગસ્તુ સાઽર્થવ્યક્તિરુદાહૃતા ॥ ૧૧૦॥

દિવ્યભાવપરીતં યચ્છૃઙ્ગારાદ્ભુતયોજિતમ્ ।
અનેકભાવસંયુક્તમુદારત્વં પ્રકીર્તિતમ્ ॥ ૧૧૧॥

અનેકાર્થવિશેષૈર્યત્ સૂક્તૈઃ સૌષ્ઠવસંયુતૈઃ ।
ઉપેતમતિચિત્રાર્થૈઃ ઉદાત્તં તચ્ચ કીર્ત્યતે ॥ ૧૧૨॥

યન્મનશ્શ્રોત્રવિષયમાહ્લાદયતિ હીન્દુવત્ ।
લીલાદ્યર્થોપપન્નાં વા તાં કાન્તિં કવયો વિદુઃ ॥ ૧૧૩॥

યો મનશ્શ્રોત્રવિષયઃ પ્રસાદજનકો ભવેત્ ।
શબ્દબન્ધઃ પ્રયોગેણ સ કાન્ત ઇતિ ભણ્યતે ॥ ૧૧૪॥

એવમેતે હ્યલઙ્કારા ગુણા દોષાશ્ચ કીર્તિતાઃ ।
પ્રયોગમેષાં ચ પુનર્વક્ષ્યામિ રસસંશ્રયમ્ ॥ ૧૧૫॥

લઘ્વક્ષરપ્રાયકૃતમુપમારૂપકાશ્રયમ્ ।
કાવ્યં કાર્યં તુ નાટ્યજ્ઞૈઃ વીરરૌદ્રાદ્ભુતાશ્રયમ્ ॥ ૧૧૬॥

ગુર્વક્ષરપ્રાયકૃતં બીભત્સે કરુણે તથા ।
કદાચિદ્રૌદ્રવીરાભ્યાં યદાધર્ષણજં ભવેત્ ॥ ૧૧૭॥

રૂપદીપકસંયુક્તમાર્યાવૃત્તસમાશ્રયમ્ ।
શૃઙ્ગારે ચ રસે વીરે કાવ્યં સ્યાન્નાટકાશ્રયમ્ ॥ ૧૧૮॥

ઉત્તરોત્તરસંયુક્તં વીરે કાવ્યં તુ યદ્ભવેત્ ।
જગત્યતિજગત્યાં વા સંકૃત્યાં વાપિ તદ્ભવેત્ ॥ ૧૧૯॥

તથૈવ યુદ્ધસમ્ફેટા ઉત્કૃત્યાં સમ્પ્રકીર્તિતૌ ।
કરુણે શક્વરી જ્ઞેયા તથૈવાતિધૃતિર્ભવેત્ ॥ ૧૨૦॥

યદ્વીરે કીર્તિતં ચ્છન્દઃ તદ્રૌદ્રેઽપિ પ્રયોજયેત્ ।
શેષાણામર્થયોગેન ચ્છન્દઃ કાર્યઃ પ્રયોક્તૃભિઃ ॥ ૧૨૧॥

યચ્છન્દઃ પૂર્વમુદ્દિષ્ટં વિષમાર્ધસમે સમમ્ ।
ઉદારમધુરૈઃ શબ્દૈસ્તત્કાર્યં તુ રસાનુગમ્ ॥ ૧૨૨॥

શબ્દાનુદારમધુરાન્ પ્રમદાભિધેયાન્
    નાટ્યાશ્રયેષુ કૃતિષુ પ્રયયેત કર્તુમ્ ।
તૈર્ભૂષિતા બહુ વિભાન્તિ હિ કાવ્યબન્ધાઃ
    પદ્માકરા વિકસિતા ઇવ રાજહંસૈઃ ॥ ૧૨૩॥

ત્રિવિધં હ્યક્ષરં કાર્યં કવિભિર્નાટકાશ્રયમ્ ।
હ્રસ્વં દીર્ઘં પ્લુતઞ્ચૈવ રસભાવવિભાવકમ્ ॥ ૧૨૪॥

એકમાત્રં ભવેદ્ હ્રસ્વં દ્વિમાત્રં દીર્ઘમિષ્યતે ।
પ્લુતં ચૈવ ત્રિમાત્રં સ્યાદક્ષરં સ્વરયોજનાત્ ॥ ૧૨૫॥

સ્મૃતે ચાસૂયિતે ચૈવ તથા ચ પરિદેવિતે ।
પઠતાં બ્રાહ્મણાનાઞ્ચ પ્લુતમક્ષરમિષ્યતે ॥ ૧૨૬॥

અકારસ્તુ સ્મૃતે કાર્યં ઊકારશ્ચાપ્યસૂયિતે ।
પરિદેવિતે તુ હાકાર ૐકારોઽધ્યયને તથા ॥ ૧૨૭॥

હ્રસ્વદીર્ઘપ્લુતાનીહ યથાભાવં યથારસમ્ ।
કાવ્યયોગેષુ સર્વેષુ હ્યક્ષરાણિ પ્રયોજયેત્ ॥ ૧૨૮॥

ચેક્રીડિતપ્રભૃતિભિર્વિકૃતૈસ્તુ શબ્દૈઃ
    યુક્તા ન ભાન્તિ લલિતા ભરતપ્રયોગાઃ ।
યજ્ઞાઙ્ક્રિયેવ રુરુચર્મધુરૈઃ કૃતાક્તૈઃ
    વેશ્યા દ્વિજૈરિવ કમણ્ડલુદણ્ડહસ્તૈઃ ॥ ૧૨૯॥

મૃદુલલિતપદાર્થં ગૂઢશબ્દાર્થહીનં
    બુધજનસુખભોગ્યં યુક્તિમન્નૃત્તયોગ્યમ્ ।

બહુરસકૃતમાર્ગં સન્ધિસન્ધાનયુક્તં
ભવતિ જગતિ યોગ્યં નાટકં પ્રેક્ષકાણામ્ ॥ ૧૩૦॥

અનુબન્ધઃ
ભૂષણાક્ષરસઙ્ઘાતૌ શોભોદાહરણે તથા ।
હેતુસંશયદૃષ્ટાન્તાઃ પ્રાપ્તાભિપ્રાય એવ ચ ॥ ૧૩૧॥

નિદર્શનં નિરુક્તં ચ સિદ્ધિશ્ચાથ વિશેષણમ્ ।
ગુણાતિપાતાતિશયૌ તુલ્યતર્કઃ પદોચ્ચયઃ ॥ ૧૩૨॥

દૃષ્ટં ચૈવોપદિષ્ટં ચ વિચારસ્તદ્વિપર્યયઃ ।
ભ્રંશશ્ચાનુનયો માલા દાક્ષિણ્યં ગર્હણં તથા ॥ ૧૩૩॥

અર્થાપત્તિઃ પ્રસિદ્ધિશ્ચ પૃચ્છા સારૂપ્યમેવ ચ ।
મનોરથશ્ચ લેશશ્ચ ક્ષોભોઽથ ગુણકીર્તનમ્ ॥ ૧૩૪॥

જ્ઞેયાન્યનુક્તસિદ્ધિશ્ચ પ્રિયં વચનમેવ ચ ।
ષટ્ત્રિંશલ્લક્ષણાન્યેવ કાવ્યબન્ધેષુ નિર્દિશેત્ ॥ ૧૩૫॥

અલઙ્કારૈર્ગુણૈશ્ચૈવ બહુભિઃ સમલંકૃતમ્ ।
ભૂષણૈરિવ ચિત્રાર્થૈસ્તદ્ ભૂષણમિતિ સ્મૃતમ્ ॥ ૧૩૬॥

યત્રાલ્પૈરક્ષરૈઃ શ્લિષ્ટૈર્વિચિત્રમુપવર્ણ્યતે ।
તમપ્યક્ષરસઙ્ઘાતં વિદ્યાલ્લક્ષણસંજ્ઞિતમ્ ॥ ૧૩૭॥

સિદ્ધૈરર્થૈઃ સમં કૃત્વા હ્યસિદ્ધોઽર્થઃ પ્રયુજ્યતે ।
યત્ર શ્લિષ્ટા વિચિત્રાર્થા સા શોભેત્યભિધીયતે ॥ ૧૩૮॥

યત્ર તુલ્યાર્થયુક્તેન વાક્યેનાભિપ્રદર્શનાત્ ।
સાધ્યન્તે નિપુણૈરર્થાસ્તદુદાહરણં સ્મૃતમ્ ॥ ૧૩૯॥

યત્ પ્રયોજનસામર્થ્યાત્ વાક્યમિષ્ટાર્થસાધકમ્ ।
સમાસોક્તં મનોગ્રાહિ સ હેતુરિતિ સંજ્ઞિતઃ ॥ ૧૪૦॥

અપરિજ્ઞાતતત્ત્વાર્થં વાક્યં યત્ર સમાપ્યતે ।
અનેકત્વાદ્વિચારાણાં સ સંશય ઇતિ સ્મૃતઃ ॥ ૧૪૧॥

સર્વલોકમનોગ્રાહિ યસ્તુ પક્ષાર્થસાધકઃ ।
હેતોર્નિદર્શનકૃતઃ સ દૃષ્ટાન્ત ઇતિ સ્મૃતઃ ॥ ૧૪૨॥

દૃષ્ટ્વૈવાવયવાન્ કાંશ્ચિદ્ ભાવો યત્રાનુમીયતે ।

પ્રાપ્તિં તામપિ જાનીયાલ્લક્ષણં નાટકાશ્રયમ્ ॥ ૧૪૩॥

અભૂતપૂર્વો યોઽપ્યર્થઃ સાદૃશ્યાત્પરિકલ્પિતઃ ।
લોકસ્ય હૃદયગ્રાહી સોઽભિપ્રાય ઇતિ સ્મૃતઃ ॥ ૧૪૪॥

યત્રાર્થાનાં પ્રસિદ્ધાનાં ક્રિયતે પરિકીર્તનમ્ ।
પરાપેક્ષાદ્યુદાસાર્થં તન્નિદર્શનમુચ્યતે ॥ ૧૪૫॥

નિરવદ્યસ્ય વાક્યસ્ય પૂર્વોક્તાર્થપ્રસિદ્ધયે ।
યદુચ્યતે તુ વચનં નિરુક્તં તદુદાહૃતમ્ ॥ ૧૪૬॥

બહૂનાં ચ પ્રધાનાનાં નામ યત્રાભિકીર્ત્યતે ।
અભિપ્રેતાર્થસિદ્ધ્યર્થં સા સિદ્ધિરભિધીયતે ॥ ૧૪૭॥

સિદ્ધાન્ બહૂન્ પ્રધાનાર્થાન્ ઉક્ત્વા યત્ર પ્રયુજ્યતે ।
વિશેષયુક્તં વચનં વિજ્ઞેયં તદ્વિશેષણમ્ ॥ ૧૪૮॥

ગુણાભિધાનૈર્વિવિધૈર્વિપરીતાર્થયોજિતૈઃ ।
ગુણાતિપાતો મધુરૈર્નિષ્ઠુરાર્થૈર્ભવેદથ ॥ ૧૪૯॥

બહૂન્ ગુણાન્ કીર્તયિત્વા સામાન્યજનસમ્ભવાન્ ।
વિશેષઃ કીર્ત્યતે યસ્તુ જ્ઞેયઃ સોઽતિશયો બુધૈઃ ॥ ૧૫૦॥

રૂપકૈરુપસાભિર્વા તુલ્યાર્થૈઃ સુપ્રયોજિતૈઃ ।
અપ્રત્યક્ષાર્થસંસ્પર્શસ્તુલ્યતર્કઃ પ્રકીર્તિતઃ ॥ ૧૫૧॥

બહૂનાં ચ પ્રયુક્તાનાં પદાનાં બહુભિઃ પદૈઃ ।
ઉચ્ચયઃ સદૃશાર્થો યઃ સ વિજ્ઞેયઃ પદોચ્ચયઃ ॥ ૧૫૨॥

યથાદેશં યથાકાલં યથારૂપં ચ વર્ણ્યતે ।
યત્પ્રત્યક્ષં પરોક્ષં વા દૃષ્ટં તદ્વર્ણતોઽપિ વા ॥ ૧૫૩॥

પરિગૃહ્ય તુ શાસ્ત્રાર્થં યદ્વાક્યમભિધીયતે ।
વિદ્વન્મનોહરં સ્વન્તમુપદિષ્ટં તદુચ્યતે ॥ ૧૫૪॥

પૂર્વાશયસમાનાર્થૈરપ્રત્યક્ષાર્થસાધનૈઃ ।
અનેકોપાધિસંયુક્તો વિચારઃ પરિકીર્તિતઃ ॥ ૧૫૫॥

વિચારસ્યાન્યથાભાવસ્તથા દૃષ્ટોપદિષ્ટયોઃ ।
સન્દેહાત્કલ્પ્યતે યસ્તુ સ વિજ્ઞેયો વિપર્યયઃ ॥ ૧૫૬॥

વાચ્યમર્થં પરિત્યજ્ય દૃષ્ટાદિભિરનેકધા ।
અન્યસ્મિન્નેવ પતનાદિહ ભ્રંશઃ સ ઇષ્યતે ॥ ૧૫૭॥

ઉભયોઃ પ્રીતિજનનો વિરુદ્ધાભિનિવિષ્ટયોઃ ।
અર્થસ્ય સાધકશ્ચૈવ વિજ્ઞેયોઽનુનયો બુધૈઃ ॥ ૧૫૮॥

ઇપ્સિતાર્થપ્રસિદ્ધ્યર્થં કીર્ત્યતે યત્ર સૂરિભિઃ ।
પ્રયોજનાન્યનેકાનિ સા માલેત્યભિસંજ્ઞિતા ॥ ૧૫૯॥

હૃષ્ટૈઃ પ્રસન્નવદનૈર્યત્પરસ્યાનુવર્તનમ્ ।
ક્રિયતે વાક્યચેષ્ટાભિસ્તદ્દાક્ષિણ્યમિતિ સ્મૃતમ્ ॥ ૧૬૦॥

યત્ર સંકીર્તયન્ દોષં ગુણમર્થેન દર્શયેત્ ।
ગુણાતિપાતાદ્ દોષાદ્વા ગર્હણં નામ તદ્ભવેત્ ॥ ૧૬૧॥

અર્થાન્તરસ્ય કથને યત્રાન્યોઽર્થઃ પ્રતીયતે ।
વાક્યમાધુર્યસમ્પન્ના સાર્થાપત્તિરુદાહૃતા ॥ ૧૬૨॥

વાક્યૈઃ સાતિશયૈરુક્તા વાક્યાર્થસ્ય પ્રસાધકૈઃ ।
લોકપ્રસિદ્ધૈર્બહુભિઃ પ્રસિદ્ધિરિતિ કીર્તિતા ॥ ૧૬૩॥

યત્રાકારોદ્ભવૈર્વાક્યૈરાત્માનમથવા પરમ્ ।
પૃચ્છ્યતે ચાભિધત્તેઽર્થં સા પૃચ્છેત્યભિસંજ્ઞિતા ॥ ૧૬૪॥

દૃષ્ટશ્રુતાનુભૂતાર્થકથનાદિસમુદ્ભવમ્ ।
સાદૃશ્યં ક્ષોભજનનં સારૂપ્યમિતિ સંજ્ઞિતમ્ ॥ ૧૬૫॥

હૃદયસ્થસ્ય વાક્યસ્ય ગૂઢાર્થસ્ય વિભાવકમ્ ।
અન્યાપદેશૈઃ કથનં મનોરથ ઇતિ સ્મૃતઃ ॥ ૧૬૬॥

યદ્વાક્યં વાક્યકુશલૈરુપાયેનાભિધીયતે ।
સદૃશાર્થાભિનિષ્પત્ત્યાઃ સ લેશ ઇતિ કીર્તિતઃ ॥ ૧૬૭॥

પરદોષૈર્વિચિત્રાર્થૈર્યત્રાત્મા પરિકીર્ત્યતે ।
અદૃષ્ટોઽપ્યન્યોઽપિ વા કશ્ચિત્ સ તુ ક્ષોભ ઇતિ સ્મૃતઃ ॥ ૧૬૮॥

લોકે ગુણાતિરિક્તાનાં ગુણાનાં યત્ર નામભિઃ ।
એકોઽપિ શબ્દ્યતે તત્તુ વિજ્ઞેયં ગુણકીર્તનમ્ ॥ ૧૬૯॥

પ્રસ્તાવેનૈવ શેષોઽર્થઃ કૃત્સ્નો યત્ર પ્રતીયતે ।
વચનેન વિનાનુક્તસિદ્ધિઃ સા પરિકીર્તિતા ॥ ૧૭૦॥

યત્પ્રસન્નેન મનસા પૂજ્યં પૂજયિતું વચઃ ।
હૃષ્ટપ્રકાશનાર્થં તુ સા પ્રિયોક્તિરુદાહૃતા ॥ ૧૭૧॥

એતાનિ કાવ્યસ્ય ચ લક્ષણાનિ
    ષટ્ત્રિંશદુદ્દેશનિદર્શનાનિ ।
પ્રબન્ધશોભાકરણાનિ તજ્જ્ઞૈઃ
    સમ્યક્ પ્રયોજ્યાનિ રસાયનાનિ ॥ ૧૭૨॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે વાગભિનયે
કાવ્યલક્ષણો નામ ષોડશોઽધ્યાયઃ ।

Encoded by Sowmya Krishnapur krsowmya@yahoo at com

*Natya Shastra Chapter 16*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*